# Akrurakritam 5 Shri Krishna Stotram

# અક્રૂરકૃતં ૫ શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Akrurakritam 5 Shri Krishna Stotram

File name : akrUrakRRitaMshrIkRRiShNastotram5.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 10/48/18-27||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2025

*sanskritdocuments.org*

# અક્રૂરકૃતં ૫ શ્રીકૃષ્ણસ્તોત્રમ્

યુવાં પ્રધાનપુરુષૌ જગદ્ધેતૂ જગન્મયૌ ।
ભવદ્ભ્યાં ન વિના કિઞ્ચિત્પરમસ્તિ ન ચાપરમ્ ॥ ૧૮॥

આત્મસૃષ્ટમિદં વિશ્વમન્વાવિશ્ય સ્વશક્તિભિઃ ।
ઈયતે બહુધા બ્રહ્મન્ શ્રુતપ્રત્યક્ષગોચરમ્ ॥ ૧૯॥

યથા હિ ભૂતેષુ ચરાચરેષુ
મહ્યાદયો યોનિષુ ભાન્તિ નાના ।
એવં ભવાન્ કેવલ આત્મયોનિ-
ષ્વાત્માઽઽત્મતન્ત્રો બહુધા વિભાતિ ॥ ૨૦॥

સૃજસ્યથો લુમ્પસિ પાસિ વિશ્વં
રજસ્તમઃસત્ત્વગુણૈઃ સ્વશક્તિભિઃ ।
ન બધ્યસે તદ્ગુણકર્મભિર્વા
જ્ઞાનાત્મનસ્તે ક્વ ચ બન્ધહેતુઃ ॥ ૨૧॥

દેહાદ્યુપાધેરનિરૂપિતત્વા-
દ્ભવો ન સાક્ષાન્ન ભિદાઽઽત્મનઃ સ્યાત્ ।
અતો ન બન્ધસ્તવ નૈવ મોક્ષઃ
સ્યાતાં નિકામસ્ત્વયિ નોઽવિવેકઃ ॥ ૨૨॥

ત્વયોદિતોઽયં જગતો હિતાય
યદા યદા વેદપથઃ પુરાણઃ ।
બાધ્યેત પાખણ્ડપથૈરસદ્ભિ-
સ્તદા ભવાન્ સત્ત્વગુણં બિભર્તિ ॥ ૨૩॥

સ ત્વં પ્રભોઽદ્ય વસુદેવગૃહેઽવતીર્ણઃ
સ્વાંશેન ભારમપનેતુમિહાસિ ભૂમેઃ ।
અક્ષૌહિણીશતવધેન સુરેતરાંશ-

રાજ્ઞામમુષ્ય ચ કુલસ્ય યશો વિતન્વન્ ॥ ૨૪॥

અદ્યેશ નો વસતયઃ ખલુ ભૂરિભાગા
યઃ સર્વદેવપિતૃભૂતનૃદેવમૂર્તિઃ ।
યત્પાદશૌચસલિલં ત્રિજગત્પુનાતિ
સ ત્વં જગદ્ગુરુરધોક્ષજ યાઃ પ્રવિષ્ટઃ ॥ ૨૫॥

કઃ પણ્ડિતસ્ત્વદપરં શરણં સમીયાત્
ભક્તપ્રિયાદૃતગિરઃ સુહૃદઃ કૃતજ્ઞાત્ ।
સર્વાન્ દદાતિ સુહૃદો ભજતોઽભિકામા-
નાત્માનમપ્યુપચયાપચયૌ ન યસ્ય ॥ ૨૬॥

દિષ્ટ્યા જનાર્દન ભવાનિહ નઃ પ્રતીતો
યોગેશ્વરૈરપિ દુરાપગતિઃ સુરેશૈઃ ।
છિન્ધ્યાશુ નઃ સુતકલત્રધનાપ્તગેહ-
દેહાદિમોહરશનાં ભવદીયમાયામ્ ॥ ૨૭॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દશમસ્કન્ધે પૂર્વાર્ધે
અષ્ટચત્વારિંશાધ્યાયાન્તર્ગતં
અક્રૂરકૃતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૦/૪૮/૧૮-૨૭॥

bhAgavatapurANa . adhyAya 10/48/18-27..

Proofread by PSA Easwaran

*Akrurakritam 5 Shri Krishna Stotram*

pdf was typeset on October 3, 2025

Please send corrections to *sanskrit@cheerful.com*